भवन्ति ॥ सौम्यान्यौषधानि सौम्येषु ऋतुषु सञ्जा-
तानि सोमगुणभूयिष्ठायां भूमौ जातान्यति-
मधुरस्निग्धशीतानि जायन्ते। एतेन शेषं व्या-
ख्यातम् ॥

तत्र पृथिव्यम्बुगुणभूयिष्ठायां भूमौ जातानि
विरेचनद्रव्याण्याददीत। अग्न्याकाशमारुतगुणभूयि-
ष्ठायां वमनद्रव्याणि। उभयगुणभूयिष्ठायामुभयतो
भागानि। आकाशगुणभूयिष्ठायां संशमनान्येवं
बलवत्तराणि भवन्ति। सर्व्वाण्येव चाभिनवान्यन्यत्र
मधु-घृत-गुड़-पिप्पली-विड़ङ्गेभ्यः। सर्व्वाण्येव स-
क्षीराणि वीर्य्यवन्ति तेषामसम्पत्तावनतिक्रान्त-
संवत्सराण्याददीतेति” ॥)

नानारोगहरौषधादिर्यथा। रुद्र उवाच।
“इदं धन्वन्तरिर्विष्णुः सुश्रुतादीनुवाच ह।
हरिः पुनर्हरायाह नानारोगान् रुगर्द्दनान्” ॥

हरिरुवाच।

“सर्व्वज्वरेषु प्रथमं कार्य्यं शङ्कर! लङ्घनम्।
क्वथितोदकपानञ्च तथा निर्व्वातसेवनम् ॥
अग्निस्वेदो ज्वरास्त्वेवं नाशमायान्ति हीश्वर!।
वातज्वरहरः क्वाथो गुडूच्या मुस्तकेन च ॥
दुरालभयैव कृतं पित्तज्वरहरं शृणु।
शुण्ठीपर्पटमुस्तैश्च वालकोशीरचन्दनैः ॥
साभयः क्वाथः श्लेष्मजन्तु सशुण्ठिः सदुरालभः।
सवालकः सर्व्वज्वरं सशुण्ठिः सहपर्पटः ॥
किराततिक्तकैर्वापि गुडूचीशुण्ठितिक्तकैः।
पित्तज्वरहरः स्याच्च शृणुष्वान्यं योगमुत्तमम् ॥
वालकोशीरपाठाभिः कण्टकारिकमुस्तकैः।
ज्वरनुत् कृतक्वाथस्तथा वै सुरदारुणा ॥
धन्याकनिम्बमुस्तानां समधुः स च शङ्कर!।
पटोलपत्रयुक्तश्च गुडूचीत्रिफलायुतः ॥
पीतोऽखिलज्वरहरः क्षुधाकृद्वातनुत्त्विदम्।
हरीतकीपिप्पलीनामामलीचित्रकोद्भवम् ॥
चूर्णं जलञ्च क्वथितं धन्याकोशीरपर्पटैः।
आमलक्या गुडूच्या च मधुयुक्तं सचन्दनम् ॥
समस्तज्वरनुत् स्याच्च सन्निपातहरं शृणु।
हरिद्रानिम्बत्रिफलामुस्तकैर्देवदारुणा ॥
कषायं कटुरोहिण्या सपटोलं सपत्रकम्।
त्रिदोषज्वरनुत् स्याच्च पीतन्तु क्वथितं जलम् ॥
कण्टकारिनागरेण गुडूच्या पुष्करेण च।
जग्ध्वा नागबलाचूर्णं श्वासकासादिनुद्भवेत् ॥
कफवातज्वरे देयं जलमुष्णं पिपासिने।
मण्डो वा मुद्गयूषं वा शाल्यन्नं वाथ यूषवत् ॥
ज्वरार्त्तमानुषे देयं ज्वरहानिस्तदा भवेत्।
विश्वपर्पटकोशीरघनचन्दनसाधितम् ॥
दद्यात् सुशीतलं वारि तृट्छर्दिज्वरदाहनुत्।
बिल्वादिपञ्चमूलस्य क्वाथः स्याद्वातिके ज्वरे ॥
पाचनं पिप्पलीमूलं गुडूचीविश्वभेषजम्।
वातज्वरे त्वयं क्वाथो दत्तः शान्तिकरः परः ॥
पित्तज्वरनुत् समधुः क्वाथः पर्पटनिम्बयोः।
विधाने क्रियमाणेऽपि यस्य संज्ञा न जायते ॥
पादयोस्तु ललाटे वा दहेल्लोहशलाकया।
तिक्ता पाठा पटोलञ्च विशाला त्रिफला त्रिवृत् ॥
सक्षीरो भेदनः क्वाथः सर्व्वज्वरविशोधनः” ॥

इति गारुड़े १७९ अध्यायः ॥ * ॥

भगवानुवाच।

“सप्तरात्रात् प्रजायन्ते खल्वीटस्य कचाः शुभाः।
दग्धहस्तिदन्तलेपात् साजाक्षीररसाञ्जनात् ॥
भृङ्गराजरसेनैव चतुर्भागेण साधितम्।
केशवृद्धिकरं तैलं गुञ्जाचूर्णान्वितेन च ॥
एला मांसी कुष्ठमुरायुक्तमभ्यङ्गतः शिव!।
गुञ्जाफलं समाप्यैव लेपनं चेन्द्रलुप्तनुत् ॥
आम्रास्थिचूर्णलेपाद्धि केशाः सूक्ष्मा भवन्ति वै।
बद्धमूला घना दीर्घाः स्निग्धाः स्युर्नोत्पतन्ति च ॥
विड़ङ्गगन्धपाषाणसाधितं तैलमुत्तमम्।
सचतुर्गुणगोमूत्रं समनःशिलमेव च ॥
शिरोऽभ्यङ्गाच्छिरोजन्मयूकालिक्षाक्षयं नयेत्।
नवदग्धशङ्खचूर्णघृतसीसकलेपिताः ॥
कचाः शुक्ला महाकृष्णा भवन्ति वृषभध्वज!।
भृङ्गराजं लोहचूर्णं त्रिफला वीजपूरकम् ॥
नीली च करवीरञ्च गुड़मेतैः समैः शृतम्।
पलितानीह कृष्णानि कुर्य्याल्लेपान्महौषधम् ॥
आम्रास्थिमज्जा त्रिफला नीली च भृङ्गराजकम्।
जीर्णं पक्वलौहचूर्णं काञ्जिकं कृष्णकेशकृत् ॥
चक्रमर्द्दकवीजानि कुष्ठमेरण्डमूलकम्।
अत्युष्णकाञ्जिकं पिष्ट्वा लेपान्मस्तकरोगनुत् ॥
सैन्धवञ्च वचा हिङ्गु कुष्ठं नागेश्वरं तथा।
शतपुष्पा देवदारु एभिस्तैलन्तु साधितम् ॥
गोपुरीषरसेनैव चतुर्भागेण संयुतम्।
तत्कर्णभरणाद्रुद्र! कर्णशूलं क्षयं नयेत् ॥
मेषमूत्रसैन्धवाभ्यां कर्णयोर्भरणात् शिव!।
कर्णयोः पूतिनाशः स्यात् कृमिस्रावादिकस्य च ॥
मालतीपुष्पदलयो रसेन भरणात् तथा।
गोजलेनैव पूरेण कर्णस्रावो विनश्यति ॥
कुष्ठमाषमरीचानि तगरं मधु पिप्पली।
अपामार्गोऽश्वगन्धा च वृहती सितसर्षपाः ॥
यवास्तिलाः सैन्धवञ्च पादिकोद्वर्त्तनं शुभम्।
लिङ्गबाहुस्तनानाञ्च कर्णयोर्वृद्धिकृद्भवेत् ॥
कटुतैलं भल्लातकं वृहतीफलदाड़िमम्।
वल्कलैः साधितं लिप्तं लिङ्गं तेन विवर्द्धते” ॥

इति गारुड़े १८० अध्यायः ॥ * ॥

हरिरुवाच।

“शोभाञ्जनपत्ररसं मधुयुक्तं हि चक्षुषोः।
भरणाद्रोगहरणं भवेन्नास्त्यत्र संशयः ॥
अशीतितिलपुष्पाणि जात्याश्च कुसुमानि च।
भया निम्बामला शुण्ठी पिप्पली तण्डुलीयकम् ॥
छायाशुष्कां वटिं कुर्य्यात् पिष्ट्वा तण्डुलवारिणा।
मधुना सह सा चाक्ष्णोरञ्जनात्तिमिरादिनुत् ॥
विभीतकास्थिमज्जा तु शङ्खनाभिर्मनःशिला।
निम्बपत्रमरीचानि अजामूत्रेण पेषयेत् ॥
पुष्पं रात्र्यन्धतां हन्ति तिमिरं पटलं तथा।
चतुर्भागाणि शङ्खस्य तदर्द्धेन मनःशिला ॥
सैन्धवञ्च तदर्द्धेन एतत् पिष्टोदकेन तु।
छायाशुष्कान्तु वटिकां कृत्वा नयनमञ्जयेत् ॥
तिमिरं पटलं हन्ति पिटकस्य महौषधम्।
त्रिकटु त्रिफला चैव करञ्जस्य फलानि च ॥
सैन्धवं रजनी द्वे च भृङ्गराजरसेन हि।
पिष्ट्वा तदञ्जनादेव तिमिरादिविनाशनम् ॥
अटरूषकमूलन्तु काञ्जिकापिष्टमेव च।
तेनाक्षिभूरिलेपाच्च चक्षुःशूलं विनश्यति ॥
सतक्रं वदरीमूलं पीतमक्षिव्यथां हरेत्।
सैन्धवं कटुतैलञ्च अपामार्गस्य मूलकम् ॥
क्षीरकाञ्जिकसंघृष्टं ताम्रपात्रे च तेन च।
अञ्जनात् पिटकस्यैव नाशो भवति शङ्कर! ॥
विल्वनीलीकारमूलं पिष्टमश्वजलेन च।
अनेनाञ्जितमात्रेण नश्यन्ति तिमिराणि हि ॥
पिप्पलीकतकञ्चैव हरिद्रामलकं वचा।
खदिरपिष्टवर्त्तिश्च अञ्जनं नेत्ररोगनुत् ॥
नीरपूर्णमुखो धौति स्वहस्तेन योऽक्षिणी।
प्रभाते नेत्ररोगैश्च नित्यं सर्व्वैः प्रमुच्यते ॥
शुक्लैरण्डस्य मूलेन पत्रेणापि प्रसाधितम्।
छागदुग्धं सेकयुक्तं चक्षुषोर्वातरोगनुत् ॥
चन्दनं सैन्धवं वृद्धपलाशञ्च हरीतकी।
पटोलकुसुमं नीली चक्रिका हरतेऽञ्जनात् ॥
गञ्जामूलं छागमूत्रघृष्टं तिमिरनुच्च तत्।
रौप्यताम्रसुवर्णानां हस्तघृष्टं शलाकया ॥
घृतं तद्वमनं रुद्र! कामलाद्याधिनाशनम्।
घोषाफलमथाघ्रातं पीतं कामलनाशनम् ॥
दूर्व्वादाड़िमपुष्पन्तु अलक्तकहरीतकी।
नासाशिरारक्तनुत् स्यान्नस्याद्वै स्वरसेन हि ॥
सुपिष्टं शिङ्गिनीमूलं तद्रसेन वृषध्वज!।
नस्यदानाद्विनश्येत नासार्शो नीललोहित! ॥
गव्यं घृतं सर्ज्जरसं रुद्र! धन्याकसैन्धवम्।
धुस्तूरकं गैरिकञ्च एतैः साधितसिक्थकम् ॥
सतैलं व्रणनुत् स्याच्च स्फुटितोष्ठटितोधरे।
जातीपत्रञ्च चर्व्वित्वा विधृतं मुखरोगनुत् ॥
भक्ष्यात् केशरवीजस्य दन्ताः सुस्खलिताः स्थिराः।
मुस्तकं कुष्ठमेला च यष्टीमधुकवालुकम् ॥
धन्याकमेतददनान्मुखदुर्गन्धनुत् हर!।
कषायं कटुकं वापि तिक्तं वै तस्य भक्षणात् ॥
तैलयुक्तस्य नित्यं स्यात् मुखदुर्गन्धताक्षयः।
दन्तव्रणानि सर्व्वाणि क्षयं गच्छन्त्यनेन तु ॥
काञ्जिकस्य सतैलस्य गण्डूषकवलाश्रितिः।
ताम्बूलचूर्णदग्धस्य मुखस्य व्याधिनुच्छिव! ॥
परित्यक्तः श्लेष्मगणः शुण्ठीचर्व्वणतो यथा।
मातुलुङ्गदलान्येला यष्टीमधु च पिप्पली ॥
जातीपत्रमथैषाञ्च चूर्णं लीढ़ं तथा कृतम्।
शेफालिकाजटायाञ्च चर्व्वणं गलशुण्ठिनुत् ॥
नासाशिरारक्तकर्णान्नश्येत् शङ्कर! जिङ्गिका।
रसः शिरीषवीजानां हलदस्य चतुर्गुणः ॥
तेन पक्वेन भूतेश! नस्यं मस्तकरोगनुत्।
गलरोगा विनश्यन्ति नस्यमात्रेण तत्क्षणात् ॥
दन्तकीटविनाशः स्यात् गुञ्जामूलस्य चर्व्वणात्।
काकजङ्घा कुष्ठी नीली कषायाम्लकमूलकम् ॥
दन्ताक्रान्तं दन्तगांश्च क्रिमीन्नाशयते शिव!।
घृतं कर्कटपादेन दुग्धोन्मिश्रेण साधितम् ॥
तेन चाभ्यञ्जिता दन्ताः कुर्य्युः कटकटाशहि।